# Vrindadevyashtakam

# વૃન્દાદેવ્યષ્ટકમ્

## Document Information

Text title : vRRindAdevyaShTakam

File name : vRRindAdevyaShTakam.itx

Category : devii, aShTaka, vishhnu, tulasI, devI

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# વૃન્દાદેવ્યષ્ટકમ્

વિશ્વનાથચક્રવર્તી ઠકુરકૃતમ્ ।

ગાઙ્ગેયચામ્પેયતડિદ્વિનિન્દિરોચિઃપ્રવાહસ્નપિતાત્મવૃન્દે ।
બન્ધૂકબન્ધુદ્યુતિદિવ્યવાસોવૃન્દે નુમસ્તે ચરણારવિન્દમ્ ॥ ૧॥

બિમ્બાધરોદિત્વરમન્દહાસ્યનાસાગ્રમુક્તાદ્યુતિદીપિતાસ્યે ।
વિચિત્રરત્નાભરણશ્રિયાઢ્યે વૃન્દે નુમસ્તે ચરણારવિન્દમ્ ॥ ૨॥

સમસ્તવૈકુણ્ઠશિરોમણૌ શ્રીકૃષ્ણસ્ય વૃન્દાવનધન્યધામિન્ ।
દત્તાધિકારે વૃષભાનુપુત્ર્યા વૃન્દે નુમસ્તે ચરણારવિન્દમ્ ॥ ૩॥

ત્વદાજ્ઞયા પલ્લવપુષ્પભૃઙ્ગમૃગાદિભિર્માધવકેલિકુઞ્જાઃ ।
મધ્વાદિભિર્ભાન્તિ વિભૂષ્યમાણાઃ વૃન્દે નુમસ્તે ચરણારવિન્દમ્ ॥ ૪॥

ત્વદીયદૌત્યેન નિકુઞ્જયૂનોઃ અત્યુત્કયોઃ કેલિવિલાસસિદ્ધિઃ ।
ત્વત્સૌભગં કેન નિરુચ્યતાં તદ્વૃન્દે નુમસ્તે ચરણારવિન્દમ્ ॥ ૫॥

રાસાભિલાષો વસતિશ્ચ વૃન્દાવને ત્વદીશાઙ્ઘ્રિસરોજસેવા ।
લભ્યા ચ પુંસાં કૃપયા તવૈવ વૃન્દે નુમસ્તે ચરણારવિન્દમ્ ॥ ૬॥

ત્વં કીર્ત્યસે સાત્વતતન્ત્રવિદ્ભિઃ લીલાભિધાના કિલ કૃષ્ણશક્તિઃ ।
તવૈવ મૂર્તિસ્તુલસી નૃલોકે વૃન્દે નુમસ્તે ચરણારવિન્દમ્ ॥ ૭॥

ભક્ત્યા વિહીના અપરાધલેશૈઃ ક્ષિપ્તાશ્ચ કામાદિતરઙ્ગમધ્યે ।
કૃપામયિ ત્વાં શરણં પ્રપન્નાઃ વૃન્દે નુમસ્તે ચરણારવિન્દમ્ ॥ ૮॥

વૃન્દાષ્ટકં યઃ શ‍ૃણુયાત્પઠેચ્ચ વૃન્દાવનાધીશપદાબ્જભૃઙ્ગઃ ।
સ પ્રાપ્ય વૃન્દાવનનિત્યવાસં તત્પ્રેમસેવાં લભતે કૃતાર્થઃ ॥ ૯॥

ઇતિ વિશ્વનાથચક્રવર્તી ઠકુરકૃતં વૃન્દાદેવ્યષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Vrindadevyashtakam*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*